International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(3): 33-38
© 2023 IJSR
www.anantaajournal.com
Received: 01-03-2023
Accepted: 05-04-2023

**मदनदेबशर्मा**
शोधछात्रः, संस्कृतविभागः,
रायगञ्जविश्वविद्यालयः,
उत्तरदिनाजपुरम्, पश्चिमबङ्गः,
भारत

Corresponding Author:
**मदनदेबशर्मा**
शोधछात्रः, संस्कृतविभागः,
रायगञ्जविश्वविद्यालयः,
उत्तरदिनाजपुरम्, पश्चिमबङ्गः,
भारत

# नादबिन्दूपनिषदि दार्शनिकतत्त्वविमर्शः

**मदनदेबशर्मा**

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i3a.2086

**सारांशः**

ऋग्वेदीयदशोपनिषत्सु योगतत्त्वप्रतिपादका नादबिन्दूपनिषद् अन्यतमास्ति। अस्यामुपनिषदि षट्पञ्चाशत् मन्त्राः सन्ति। अस्यामुपनिषदि ओंकारः साक्षात् ब्रह्मस्वरूपमिति वर्णितमस्ति। उपनिषदः प्रारम्भावस्थायाम् ओंकार एकः पक्षिस्वरूपमिति वर्णितमस्ति। पक्षिस्वरूपस्य ओंकारस्य सर्वेषु अङ्गेषु भूर्लोकादीनां देवानां च निवासस्थानमस्ति। तत्पश्चात् ओंकारस्य साधना तथा ओंकारस्य विभिन्नेषु मात्रासु प्राणवियोगस्य फलस्य वर्णनमस्ति। अनन्तरं योगयुक्तस्थितेः वर्णनाप्रसङ्गे सांख्यदर्शनस्य पञ्चविंशतितत्त्वानामालोचनाः सन्ति। अस्यामुपनिषदि वेदान्तदर्शनस्य प्रारब्धकर्मक्षयविषये सम्यग् मार्गो निर्देशितोऽस्ति। प्रारब्धकर्मणः आलोचनाप्रसङ्गे अध्यासतत्त्वस्य संक्षिप्तालोचनमस्ति। तत्पश्चात् नादानुसन्धानस्य वर्णनमस्ति। नादस्य ज्ञानेनैव साधकः परमपदं लब्धुं शक्नोति, तदर्थं निरन्तरं साधना करणीया।

**कूटशब्दः** उपनिषद्, दर्शनम्, अध्यासः, प्रारब्धकर्म, मुक्तिः

## प्रस्तावना

मानवजीवनस्य आध्यात्मिकज्ञानस्य आधारो भवति वेदः। वेदस्य नामान्तराणि भवन्ति श्रुति-त्रयी-आम्नाय-छन्दस्-आगमश्च। 'विद्' धातोरुत्तरं 'घञ्' प्रत्ययेन वेदशब्दो निष्पन्नो भवति। विद्-धातुः ज्ञाने सत्तायां लाभे विचारणे च प्रयुक्तो भवति। तद्यथा महर्षिः दयानन्द आह –

"विदन्ति जानन्ति विद्यन्ते भवन्ति विदन्ति विदन्ते लभन्ते, विदन्ते विचारयन्ति सर्वे मनुष्याः सर्वा सत्यविद्या यैर्येषु वा"[1]। 'विद्'-धातुः ज्ञानार्थे प्रयुक्तं भवति चेत् येन शास्त्रेण सत्यतत्त्वं ज्ञातुं शक्यते सो वेदः। यदि 'विद्' धातुः सत्तायां प्रयुक्तं भवति, तर्हि सत्यतत्त्वस्याधारो भवति वेदः। 'विद्' धातुः

[1]द्रष्टव्यम्, वैदिक साहित्य का इतिहास, रघुवीर वेदालङ्कार(लेखकः), पृ-३

लाभार्थे प्रयुक्तं भवति चेत्, येन शास्त्रेण सत्यतत्त्वं लब्धुं शक्यते सो वेदः। 'विद्' धातुः विचारणे प्रयुक्तं भवति चेत्, यस्मिन् शास्त्रे सत्यतत्त्वस्य विश्लेषणं कृतमस्ति सो वेदः। वेदस्य विभागचतुष्टयमस्ति। तद्यथा संहिता-ब्राह्मण-आरण्यक-उपनिषद् च। संहितायां स्तुतिमूलकमन्त्राणां संग्रहो वर्तते। ब्राह्मणांशे यागयज्ञानामालोचनाः सन्ति। आरण्यकस्य आलोचनाप्रसङ्गे सायणाचार्य आह – 'अरण्य एव पाठ्यत्वातरण्यकमितीर्यते'[2]। आरण्यके प्राणविद्या – प्रतीकोपासनायाः च आलोचने स्तः। उपनिषदंशे वैदिकज्ञानकाण्डस्य आलोचनास्ति। उपनिषद् मानवजीवनस्य चरमं लक्षं तत्प्राप्तिसाधनं च उपदिशति।

उप-नि पुर्वकं सद् धातोरुत्तरं क्विप् प्रत्ययेन उपनिषद् शब्दो निष्पन्नो भवति। अत्र उपशब्दस्यार्थो भवति सामीप्यमिति। नि-शब्दो निश्चयार्थे प्रयुक्तो भवति। सद्-धातुः विनाशे प्राप्ते शिथिलीकरणे च प्रयुक्तं भवति।

'सद्'-धातुः विनाशार्थे प्रयुक्तं भवति चेत् यया विद्यया निश्चितरूपेण संसारस्य सारतत्त्वं विनष्टं भवति सा उपनिषद्।

'सद्' धातुः गतिः प्राप्तिः वा अर्थे प्रयुक्तं भवति चेत् गुरुसकाशात् संशयनिरसनपुर्वकम् अधिगता यया विद्यया ब्रह्मतत्त्वे उपनीतं भवितुं शक्यते ब्रह्मप्राप्तिर्भवति वा सा उपनिषद्।

'सद्'-धातोरर्थः शिथिलीकरणार्थे प्रयुक्तं भवति चेत् यया विद्यया निश्चितरूपेण संसारस्य सारतत्त्वं विनष्टं भवति सा उपनिषदिति।

बृहदारण्यकोपनिषदो भाष्यभूमिकायां शङ्कराचार्य आह – "सेयं ब्रह्मविद्या उपनिषद्वाच्या, तत्पराणां सहेतः संसारस्य अत्यन्तावसादनात् उपनिपूर्वकस्य सदेस्तदर्थत्वात्" [3]। उपनिषदित्युक्ते ब्रह्मविद्यां बोधयति। ब्रह्मविद्यापरायणस्य अविद्याप्रसुतसंसारस्य उच्छेदं भवति। उप-नि-पूर्वकस्य सद्-धातु अस्मिन्नार्थे प्रयुक्तं भवति।

उपनिषद् शब्दस्यार्थो ब्रह्मविद्या इति उच्यते। अनया विद्यया गर्भ-जन्म-जरादि विनष्टं भवति। ब्रह्मप्राप्ति अपि भवति। अस्यां विद्यायां परमश्रेयो मोक्षमार्गः सन्निहितोऽस्ति।

पॉलड्यूसेनस्य 'फिलोसोफी आफ द उपनिषदस्' इति पुस्तिकायां उपनिषद् रहस्यविद्यारूपेण कल्पितास्ति।

आध्यात्मिकज्ञानस्य भाण्डारो भवति भारतीयदर्शनम्। भारतीयदर्शने आध्यात्मिकज्ञानस्य आधारो भवति वेदान्त इति। वेदान्त इत्युक्ते उपनिषदं बोधयति। तद्यथा वेदान्तसारकारः श्रीमद्योगीन्द्रसदानन्द आह – "वेदान्तो नाम उपनिषत्प्रमाणम्"[4]। अत्र अन्तशब्दस्यार्थः उत्कृष्टसारतत्त्वमिति। वेदस्य अन्तपरिणतिः भवति उपनिषदिति। उपनिषदि वैदिककालस्य दार्शनिकमतवादाः प्रकाशिता अस्ति।

उपनिषदः कालनिर्णयोऽत्यन्तं दुष्करमस्ति। भारतीयपरम्परायां उपनिषद् भवति श्रुतेः अङ्गस्वरूपा। अत उपनिषद् भवति कालातीता। अस्यामुपनिषदि निहिततत्त्वं शाश्वतकालतः सत्यमस्ति। तदपि विद्वांसः उपनिषदः कालनिर्णय इव क्लिष्टविषयोपरि स्वस्वमतं उपस्थापितवन्तः। विषयेऽस्मिन् विद्वत्सु मतभेदाः सन्ति। केचन विद्वासः स्वीकुर्वन्ति तैत्तिरीय-छान्दोग्य-बृहदारण्यक-ईश-कठ-केन-ऐतरेयोपनिषदश्च सुप्राचीनाः सन्ति। एतासाम् उपनिषदां रचनाकालः ८०० ई. पू. भवितुं शक्यते।

राधाकृष्णनमहोदयस्य मतानुसारेण प्रमुखोपनिषदो रचनाकालः ८०० ई. पूर्वतः ३०० ई. पूर्वपर्यन्तं भवितुं शक्यते।

तिलकमहोदयस्य मतानुसारेण उपनिषदो रचनाकालः २५०० ई. पूर्वतः २००० ई.पू. भवितुं शक्यते।

प्राच्यविशेषज्ञो म्याक्डोनालस्य मतानुसारेण उपनिषदो रचनाकालः ६०० ई.पू. भवितुं शक्यते।

उपनिषद्-साहित्यम् अतीव विशालमस्ति। उपनिषदः संख्याविषये विद्वत्सु मतभेदाः सन्ति। अष्टोत्तरशतसंख्यकाः उपनिषदः सन्ति इति मुक्तिकेपनिषदि कथितमस्ति। एतासु उपनिषत्सु काश्चनोपनिषदः ऋग्वेदस्यान्तर्गताः सन्ति। काश्चनोपनिषदः

---

[2] तत्रैव, पृ-११०

[3] द्रष्टव्यम्, वृहदारण्यकोपनिषद्, करुणासिन्धुदास, वेचारामघोष, सुवुद्धिचरणगोस्वामी (सम्पादकाः), पृ-९

[4] द्रष्टव्यम्, वेदान्तसारः, विपदभञ्जन पाल (अनुवादको व्याख्याकारश्च), पृ-१९

यजुर्वेद-सामवेद-अथर्ववेदस्य च अन्तर्गताः सन्ति। उपनिषत्सु प्रत्येकोपनिषदः प्रामाणिकत्वं समानं नास्ति। प्रायेण दशोपनिषदः प्राचीनत्वात् विशदतया विषयस्य प्रतिपादकत्वात् च प्रामाणिकाः भवन्ति। ताः भवन्ति –

ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा।[5]

ऋग्वेदीयोपनिषत्सु ऐतरेयोपनिषद्, सामवेदीयोपनिषत्सु छान्दोग्य-केनोपनिषच्च, कृष्णयजुर्वेदीयोपनिषत्सु तैतिरीय-कठोपनिषच्च, शुक्लयजुर्वेदीयोपनिषत्सु बृहदारण्यक-ईशावास्योपनिषच्च, तथा अथर्ववेदीयोपनिषत्सु मुण्डक-माण्डूक्य-प्रश्नोपनिषच्च नितरां प्राचीनाः प्रामाणिकाः सन्ति। शङ्कराचार्येण एतासु उपनिषत्सु भाष्यं प्राप्यते। शङ्कराचार्यः स्वभाष्येण अद्वैतं श्रीरामानुजाचार्यस्य विशिष्टाद्वैतं मध्वाचार्यस्य द्वैतं तत्र प्रतिपादयति। वस्तुत उपनिषत्सु सर्वेषां दर्शनानां बीजानि निहितानि सन्ति। इदं सत्यं यद् उपनिषत्सु ऋषिणाम् आध्यात्मिकविचाराणां मनोज्ञो बहुमूल्यशाली च महान् कोषः विद्यते।

वैदिकसाहितस्य प्रचीनतमं निदर्शनं भवति ऋग्वेदः। ऋक्संहिता एव ऋग्वेदः। भारतीयपरम्परायाम् ऋग्वेदे दशोपनिषदः सन्ति। तद्यथा - ऐतरेय-कौषीतकि-नादबिन्दू-आत्मबोध-निर्वाण-मुद्गल-अक्षमालिक-त्रिपुर-सौभाग्यलक्ष्मी-बह्वृचोपनिषदश्च।

सर्वासु उपनित्सु प्रत्यक्षरूपेण परोक्षरूपेण च योगतत्त्वस्य वर्णनमस्ति। योगतत्त्वस्य आदिरूपरेखा वैदिकसंहितासु प्रस्फुटितास्ति। उपनिषत्सु एषा रूपरेखा परिपूर्णावस्था प्राप्यते। पुराण-महाभारत-तन्त्र धर्मशास्त्रेषु च योगतत्त्वस्य वर्णनमस्ति। कालान्तरे पतञ्जलिप्रणीतं योगसूत्रम् उल्लेखनीयमस्ति। अपि तु व्यास-वाचस्पति-भोज-विज्ञानभिक्षु-नागेशभट्ट-सदाशिवेन्द्रसरस्वत्यादिग्रन्थकाराणां रचनासु योगतत्त्वस्यालोचनास्ति। योगस्य सहायतायां भारतीयदर्शनेषु वर्णितेषु धर्मादिपुरुषार्थचतुष्टयस्य प्राप्तिर्भवति। विभिन्नेषु दर्शनेषु ज्ञानतत्त्वस्य प्राधान्यं प्रतिपादितमस्ति। किन्तु सैद्धान्तिकतत्त्वज्ञानस्य व्यवहारिकजीवने प्रयोगस्य विधानं योगशास्त्रे वर्णितमस्ति।

भारतीयवाङ्मये योगस्य महत्वपूर्णस्थानमस्ति। मानवजीवनस्य ऐहिकानां पारलौकिकानां च प्रमुखसाधनस्य कारणं भवति योगः। ऋषिणां मन्त्रसाक्षात्कारस्य सहायको भवति योगः। योगस्य सहायतायां आर्षग्रन्थाः लिखिताः सन्ति।

'युज्'-धातो उत्तरं घञ्-प्रत्ययेन योगशब्दो निष्पन्नो भवति। योगशब्दस्य अर्थद्वयमस्ति। प्रथमतः योगशब्दस्यार्थो भवति संयोगः। उपनिषदि योगशब्दः संयोगार्थे प्रयुक्तोऽस्ति। अत्र संयोग-इत्युक्ते जीवात्मना सह परमात्मनः संयोगं बोधयति। अनेन जीवात्मनो दुःखत्रयस्य आत्यन्तिकं निवृत्तिर्भवति। द्वितीयतः योगसूत्रस्य भाष्यकारः महर्षिः व्यासदेवः योगशब्दस्यार्थप्रसङ्गे आह – "योगः समाधिः"[6]। महर्षिः पतञ्जलिः योगस्य लक्षणप्रसङ्गे आह – "योगश्चित्तवृत्तिनिरोधः"[7]। अत्र निरोधशब्दो विनाशार्थे प्रयुक्तो नास्ति। निरोधावस्थायां चित्तवृत्तयः स्व-स्व-अधिकरणे लीनाः भवन्ति।

नादबिन्दूपनिषद् ऋग्वेदस्य अप्रधानोपनिषद्रूपेण परिचितास्ति। भारतीयदर्शने अप्रधानोपनिषदां गुरूत्वपूर्णाः भूमिकाः सन्ति। स्थूलदेहतः सूक्ष्मातिसूक्ष्मात्मापर्यन्तम् अप्रधानोपनिषदाम् अवाधविचरणमस्ति। एताषु उपनिषत्सु कुत्रपि उपनिषदि विस्तृततया अन्यत्रापि स्वल्पपरिसरे च योगतत्त्वानां सूक्ष्मातिसूक्ष्मतत्त्वानामालोचनानि सन्ति।

ऋग्वेदीयोपनिषत्सु योगतत्त्वप्रतिपादिता नादबिन्दूपनिषद् अन्यतमास्ति। उपनिषदः परमलक्ष्यं भवति आत्मज्ञानम्। जीव अज्ञानयुक्तो भवति चेत् पापपुण्यादिचक्रे निमज्जितो भवति। आत्मस्वरूपस्य यथार्थोज्ञानोत्पत्तिर्भवति चेत् अज्ञानस्य नाशो भवति। साधनायाः प्रारम्भावस्थायां निराकारं निर्गुणं च ब्रह्मसाक्षात्कारं दुष्करं भवति। अस्मात्कारणात् नादबिन्दूपनिषदि

[5] मुक्तिकोपनिषद्-१/३०

[6] द्रष्टव्यम्, पातञ्जल दर्शन, पूर्णचन्द्र शर्मा(संकलकः), पृ-३

[7] योगसूत्रम्-१/२

ब्रह्मसाक्षात्कारोपायरूपेण प्रणवोपासनायाः कथास्ति। अस्यामुपनिषदि ओंकारः साक्षात् ब्रह्मस्वरूपमिति कल्पितमस्ति। प्रणवस्य ज्ञानेनैव साधकः परमपदं प्राप्तुं शक्यते। तदर्थं निरन्तरं साधना करणीया। अस्यामुपनिषदि नादानुसन्धानस्य मुख्यबिन्दोः प्रणवरहस्यस्य वर्णनमस्ति।

उपनिषदः प्रारम्भावस्थायाम् ओंकार एकहंसरूपेण परिकल्प्यते। हंसोपासनया साधको ब्रह्मसाक्षात्कारस्य अधिकारी भवितुं शक्यते। ओंकारे ये तावत् अक्षराः सन्ति ते हंसस्य अङ्गस्वरूपाणि इति कल्पिता अस्ति। तद्यथा अस्यामुपनिषदि कथितमस्ति –

अकारो दक्षिणः पक्ष उकारस्तूत्तरः स्मृतः।
मकारं पुच्छमित्याहुरर्धमात्रा तु मस्तकम्।।[8]

ओंकारस्य अकारो भवति दक्षिणपक्षस्वरूप इति। उकारो भवति उत्तरपक्षस्वरूप इति। मकारो भवति पुच्छस्वरूप इति। अर्धमात्रा तु मस्तकस्वरूपिणीति। नादबिन्दूपनिषदि मात्राभेदे प्रणवमन्त्रजपस्य फलश्रुतिः वर्णितास्ति। ओंकारे मात्राचतुष्टयमस्ति। प्रत्येकमात्राः उदात्त-अनुदात्त-स्वरितभेदे स्वरत्रयेषु विभाजिताः सन्ति। अत ओंकारे द्वादशमात्राः सन्ति। ते भवन्ति – घोषिणी-विद्युन्माला-पतङ्गिनी-वायुवेगिनी-नामधेया-ऐन्द्री-वैष्णवी-शङ्करी-महती-धृति-नारी-ब्राह्मी च। घोषिणीमात्रायां प्राणान्ते परजन्मनि सार्वभौमः चक्रवर्ती राजा भवितुं शक्यते। विद्युन्मालामात्रायां प्राणान्ते परजन्मनि साधको यक्षो भवितुं शक्यते। पतङ्गिनीमात्रायां प्राणान्ते विद्याधरो भवति। वायुवेगिनीमात्रायां प्राणान्ते गन्धर्वप्राप्तिर्भवति। नामधेयामात्रायां प्राणान्ते सोमलोके देवत्वप्राप्तिर्भवति। ऐन्द्रीमात्रायां प्राणान्ते इन्द्रस्य सायुज्यलाभो भवति। वैष्णवीमात्रायां प्राणान्ते विष्णुपदलाभो भवति। शङ्करीमात्रायां प्राणान्ते पशुपतिरुद्रस्य धामप्राप्तिर्भवति। महतीमात्रायां प्राणान्ते महःप्राप्तिर्भवति। धृतिमात्रायां प्राणान्ते ध्रुवलोकप्राप्तिर्भवति। नारीमात्रायां प्राणान्ते तपलोकप्राप्तिर्भवति। ब्राह्मीमात्रायां प्राणान्ते ब्रह्मलोकप्राप्तिर्भवति। ब्रह्मलोकस्य अन्तिमा सीमा नास्ति। ततः परं श्रेष्ठ-शुद्ध-अतन्त-व्यापक-निष्कल-कल्याणस्वरूपं च परब्रह्म अस्ति।

नादबिन्दूपनिषदि योगयुक्तस्थितेः वर्णनाप्रसङ्गे सांख्यदर्शनस्य पञ्चविंशतितत्त्वानामालोचनाः सन्ति। सांख्यदर्शनस्य पञ्चविंशतितत्त्वानि भवन्ति – पञ्चकर्मेन्द्रियाणि पञ्चज्ञानेन्द्रियाणि मनो बुद्धि अहंकारः पञ्चतन्मात्राणि पञ्चमहाभूतानि प्रकृतिः पुरुषश्च। अस्यामुपनिषदि कथितास्ति मनः कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि च प्रति आसक्तं भवति चेत् साधको गुणत्रयस्य प्रभावेन पुनः पुनो जन्म-मृत्युचक्रे च आवर्तते। मन एव मनुष्याणां कारणं मोक्षबन्धनम्। मन इन्द्रियाणां भोग्यविषयं परित्यज्य गुणातीतं भवति चेत् कल्याणकारि योगयुक्तं स्थिरावस्थाप्राप्तुं शक्यते। तद्यथा अस्यामुपनिषदि कथितास्ति –

अतीन्द्रियं गुणातीतं मनो लीनं यदा भवेत्।
अनुपमं शिवं शान्तं योगयुक्तां सदा विशेत्।।[9]

तत्पश्चात् महद्विजयस्य प्रयोजनमस्ति। ज्ञानात् अहंकारोत्पत्तिर्जायते। साधकस्य मनः अहंकारवर्जितं भवति चेत् संसारबन्धनं विनष्टं भवति। अनेन साधकः परमतत्त्वं प्राप्तुं शक्यते।

अस्यामुपनिषदि न केवलं योगतत्त्वस्य आलोचनास्ति। अपि तु वेदान्तदर्शनस्य बिन्दुविषशेषस्य विशदतया वर्णनमस्ति। नादबिन्दूपनिषदि वेदान्तदर्शनस्य सञ्चित-क्रियमाण-प्रारब्धरूपकर्मक्षयविषये सम्यग् मार्गो निर्देशितोऽस्ति। जीवस्य प्रयाणकाले सञ्चितकर्मणो कश्चनांशः पुनर्जन्म-शरीर-भोगादिफलप्रदाने सहायको भवति तदेव प्रारब्धकर्म। पूर्वजन्मनः कर्म भवति प्रारब्धकर्म। प्रारब्धातिरिक्तं कर्म भवति सञ्चितकर्म।

प्रारब्धकर्म कदा खण्डितं भवति विषयेऽस्मिन् अस्यामुपनिषदि कथितमस्ति –

[8] नादबिन्दूपनिषद्-१

[9] तत्रैव-१८

उत्पन्ने तत्त्वविज्ञाने प्रारब्धं नैव मुञ्चति।
तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते।।[10]

ज्ञानाग्निना सर्वाणि कर्माणि नश्यन्ते। यथा दग्धबीजम् अङ्कुरोत्पादनं कर्तुं न शक्यते, तथैव ज्ञानाग्निना अज्ञानस्य नाशो भवति चेत् अज्ञानस्य पुनरुत्थानं न भवति। आत्मज्ञानीनां प्रारब्धकर्मणः सत्त्वा तिष्ठति। ते संसारस्य भोग्यविषयेषु आकृष्टाः भवन्ति। किन्तु तत्त्वज्ञानीनां प्रारब्धकर्मणोऽभावो दरीदृश्यते। तत्त्वज्ञानोत्पत्तिर्भति चेत् कर्मफलस्य नाशो भवति।
सुप्तावस्थायां स्वप्नः सद्रूपेण प्रतिभाति, किन्तु जागरणावस्थायां सः स्वप्नः मिथ्यास्वरूपमिति। तथैव तत्त्वज्ञानीनां कृते प्रारब्धकर्मणो महत्वं नास्ति। अज्ञजनानां कृते प्रारब्धकर्मण आलोचना अस्ति। यथार्थज्ञानोत्पत्तिर्भवति चेत् जगत्प्रपञ्चम् असद्रूपेण प्रतिभाति।
अपि च अस्यामुपनिषदि वेदान्तदर्शनस्य अध्यासतत्त्वस्य वर्णनमस्ति। अध्यासस्य समानार्थकाः शब्दाः आरोप अध्यारोपो भ्रमश्च। वेदान्तसारकारो योगीन्द्रसदानन्द अध्यारोपस्य लक्षणप्रसङ्गे आह – "असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्तु-आरोपः अध्यारोपः" [11]। अत्र ब्रह्म एव सद्वस्तु, जगत्प्रपञ्चम् अवस्तु एव। रज्जौ सर्पारोपवत् ब्रह्मणि जगत्प्रपञ्चस्यारोपो भवति अध्यारोपः। जगत्प्रपञ्चं भवति अज्ञानस्य कारणस्वरूपम्। अज्ञानस्य प्रभावेन रज्जौ सर्पभ्रमोत्पत्तिर्जायते। यथार्थज्ञानोत्पत्तिर्भवति चेत् रज्जौ सर्पज्ञानं तिरोहितं भवति। अत अज्ञानस्य प्रभावेन जगत् सद्रूपेण प्रतिभाति। प्रारब्धकर्माभावे किं तावत् प्रमाणं विषयेऽस्मिन् अस्यामुपनिषदि अध्यासतत्त्वस्य आलोचना कृतास्ति। तद्यथा अस्यामुपनिषदि कथितास्ति –

अज्ञानं चेति वेदान्तैस्तस्मिन्नष्टे क्व विश्वता।
यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात्।।
तद्वत्सत्यमविज्ञाय जगत्पश्यति मूढधीः।
रज्जुखण्डे परिज्ञाते सर्परूपं न तिष्ठति।।[12]

वेदान्तदर्शनानुसारेण जगत्प्रपञ्चम् अज्ञानस्वरूपमिति। यथैव रज्जौ सर्पज्ञानस्य नाशो भवति चेत् यथार्थज्ञानोत्पत्तिर्भवति। आत्मज्ञानाभावे अज्ञजनानां समीपे जगत्प्रपञ्चं सद्रूपेण प्रतिभाति। जगत्प्रपञ्चस्य अधिष्ठानस्वरूपम् आत्मतत्त्वस्य साक्षात्कारो भवति चेत् जगन्मिथ्यास्वरूपमिति भावोत्पत्तिर्भवति।
योगतत्त्वप्रतिपादितनादतत्त्वस्य नादबिन्दूपनिषदि विस्तृतालोचना अस्ति। ब्रह्मानुभूत्यै कथं चित्तं नादानुसक्तं करणीयं विषयेऽस्मिन् अस्यामुपनिषदि झङ्कृतास्ति –

सर्वचिन्तां समुत्सृज्य सर्वचेष्टाविवर्जितः।
नादमेवानुसंदध्यान्नादे चित्तं विलीयते।।[13]

सर्वेषां विषयाणां चिन्तनं परित्यज्य निरन्तरं नादानुसन्धानेन नादाभ्यासेन च नादे मनो लीनं भवति। नादेन चित्तमेकाग्रं भवितुं शक्यते। नादासक्तः साधकः संसारस्य भोग्यविषयेषु आकृष्टो न भवति।
ब्रह्मानुभूतिकाले योगिनोऽवस्था कथं प्रतीयते विषयेऽस्मिन् अस्यामुपनिषदि आम्नातम् –

'काष्ठवज्जायते देह उन्मन्यावस्थया ध्रुवम्'।
न जानाति स शीतोष्णं न दुखं न सुखं तथा।।[14]

नादस्य विभागद्वयमस्ति। तद्यथा आनाहत-आहतश्च। सर्वेषु जीवेषु नादद्वयं वर्तते, किन्तु मानवशरीरं नादानुसन्धानस्य अत्यन्तम् उपयोगित्वमिति विवेचितमस्ति। योगी निरन्तरम् ओंकारस्य साधनायामाहतनादतः अनाहतनादं गन्तुं शक्यते। अस्यामवस्थायां शरीरं काष्ठवत् जायते। योगिनः कश्चनापि विकारोत्पत्तिर्नभवति। योगी शीत-उष्ण-सुख-दुःखादिविषयेषु निर्विकारो तिष्ठति। मनः-दृष्टि-प्राणवायुश्च स्थिरावस्थायां तिष्ठन्ति।

---

[10] तत्रैव-२२

[11] द्रष्टव्यम्, वेदान्तसार, लोकनाथ चक्रवर्ती(सम्पादकः), पृ-९०

[12] नादबिन्दूपनिषद्-२६-२७

[13] तत्रैव-४१

[14] तत्रैव-५३

तत्पश्चात् प्रणवस्थितं तुरीयावस्थां प्राप्तुं शक्यते। अनेन योगिना परमपदं लब्धुं शक्यते।

## ग्रन्थपञ्जी

### मुख्यग्रन्थाः


1. उपनिषत्सञ्चयनम्, केशवलाल वी. शास्त्री (अनुवादकः), चौखम्वा संस्कृत प्रतिष्ठान, २०२१
2. नादबिन्दु उपनिषद्, पंकच माला शर्मा (व्याख्याकारः), संजय प्रकाशन, दिल्ली, २०२१
3. पातञ्जल दर्शन, पूर्णचन्द्र शर्म्मा (संकलकः), पश्चिमवङ्ग राज्य पुस्तक पर्षद्, २००५
4. वेदान्तदर्शनम्, दुर्गाचरणसांख्यवेदान्ततीर्थः(सम्पादकः), देव साहित्य कुटीर प्रा. लि., कलिकाता, २०१६
5. वेदान्तसारः, विपदभञ्जन पाल (अनुवादको व्याख्याकारश्च), संस्कृत पुस्तक भाण्डार, कलकाता, २०१६
6. वेदान्तसारः, लोकनाथ चक्रवर्ती (सम्पादकः), पश्चिमवङ्ग राज्य पुस्तक पर्षद्, कलकाता, २०१४
7. बृहदारण्यकोपनिषद्, करुणासिन्धुदास, वेचारामघोष, सुवुद्धिचरणगोस्वामी (सम्पादकाः), संस्कृत वुक डिपो, कलकाता, २०१९


### गौणग्रन्थाः


8. गैरोला, वाचस्पति, वैदिक साहित्य और संस्कृति, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१६
9. भट्टाचार्य, अमित, भारतीय दर्शनेर रूपरेखा, संस्कृत वुक डिपो, कलकाता, २०१३
10. भट्टाचार्य, समरेन्द्र, भारतीयदर्शन, वुक सिण्डिकेट प्राइभेट लिमिटेड, कलकाता, २०१३
11. वेदालङ्कार, रघुवीर, वैदिक साहित्य का इतिहास, चौखम्भा ओरियन्टलिया, दिल्ली, २००७